श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७६

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७६

*उद्धवदूत्यवर्णनम्*

गत्वा सान्दीपनिमथ चतुष्षष्टिमात्रैरहोभिः
    सर्वज्ञस्त्वं सह मुसलिना सर्वविद्या गृहीत्वा।
पुत्रं नष्टं यमनिलयनादाहृतं दक्षिणार्थं
    दत्वा तस्मै निजपुरमगा नादयन् पाञ्चजन्यम्॥ १ ॥

स्मृत्वा स्मृत्वा पशुपसुदृशः प्रेमभारप्रणुन्नाः
    कारुण्येन त्वमपि विवशः प्राहिणोरुद्धवं तम्।
किञ्चामुष्मै परमसुहृदे भक्तवर्याय तासां
    भक्त्युद्रेकं सकलभुवने दुर्लभं दर्शयिष्यन्॥ २ ॥

त्वन्माहात्म्यप्रथिमपिशुनं गोकुलं प्राप्य सायं
    त्वद्वार्ताभिर्बहु स रमयामास नन्दं यशोदाम्।
प्रातर्दृष्ट्वा मणिमयरथं शङ्किताः पङ्कजाक्ष्यः
    श्रुत्वा प्राप्तं भवदनुचरं त्यक्तकार्याः समीयुः॥ ३ ॥

दृष्ट्वा चैनं त्वदुपमलसद्वेषभूषाभिरामं
    स्मृत्वा स्मृत्वा तव विलसितान्युच्चकैस्तानि तानि।
रुद्धालापाः कथमपि पुनर्गद्गदां वाचमूचुः
    सौजन्यादीन् निजपरभिदामप्यलं विस्मरन्त्यः॥ ४ ॥

श्रीमन् किं त्वं पितृजनकृते प्रेषितो निर्दयेन
    क्वासौ कान्तो नगरसुदृशां हा हरे नाथ पायाः।
आश्लेषाणाममृतवपुषो हन्त ते चुम्बनाना-
    मुन्मादानां कुहकवचसां विस्मरेत् कान्त का वा॥ ५ ॥

www.prapatti.com

रासक्रीडालुलितललितं विश्लथत्केशपाशं
    मन्दोद्भिन्नश्रमजलकणं लोभनीयं त्वदङ्गम्।
कारुण्याब्धे सकृदपि समालिङ्गितुं दर्शयेति
    प्रेमोन्मादाद्भुवनमदन त्वत्प्रियास्त्वां विलेपुः॥ ६ ॥

एवम्प्रायैर्विवशवचनैराकुला गोपिकास्ता-
    स्त्वत्सन्देशैः प्रकृतिमनयत् सोऽथ विज्ञानगर्भैः।
भूयस्ताभिर्मुदितमतिभिस्त्वन्मयीभिर्वधूभि-
    स्तत्तद्वार्तासरसमनयत् कानिचिद्वासराणि॥ ७ ॥

त्वत्प्रोद्गानैः सहितमनिशं सर्वतो गेहकृत्यं
    त्वद्वार्तैव प्रसरति मिथः सैव चोत्स्वापलापाः।
चेष्टाः प्रायस्त्वदनुकृतयस्त्वन्मयं सर्वमेवं
    दृष्ट्वा तत्र व्यमुहदधिकं विस्मयादुद्धवोऽयम्॥ ८ ॥

राधाया मे प्रियतममिदं मत्प्रियैवं ब्रवीति
    त्वं किं मौनं कलयसि सखे मानिनी मत्प्रियेव।
इत्याद्येव प्रवदति सखि त्वत्प्रियो निर्जने मा-
    मित्थंवादैररमयदयं त्वत्प्रियामुत्पलाक्षीम्॥ ९ ॥

एष्यामि द्रागनुपगमनं केवलं कार्यभारा-
    द्विश्लेषेऽपि स्मरणदृढतासम्भवान्मास्तु खेदः।
ब्रह्मानन्दे मिलति नचिरात् सङ्गमो वा वियोग-
    स्तुल्यो वः स्यादिति तव गिरा सोऽकरोन्निर्व्यथास्ताः॥ १० ॥

एवं भक्तिः सकलभुवने नेक्षिता न श्रुता वा
    किं शास्त्रौघैः किमिह तपसा गोपिकाभ्यो नमोऽस्तु।
इत्यानन्दाकुलमुपगतं गोकुलादुद्धवं तं
    दृष्ट्वा हृष्टो गुरुपुरपते पाहि मामामयौघात्॥ ११ ॥

**********



www.prapatti.com